॥ ओ३म् ॥

यस्य स्नेहो भयं तस्य
स्नेहो दुःखस्य भाजनम्।
स्नेहमूलानि दुःखानि
तानि त्यक्त्वा वसेत्सुखम्॥

(चाणक्य-नीति)

RNI No.: DELSAN/2011/38660 ISSN 2321 - 4937

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥

अनागतविधाता च
प्रत्युत्पन्नमतिस्तथा।
द्वावेतौ सुखमेधेते
यद्भविष्यो विनश्यति॥

(चाणक्य-नीति)

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइट: www.sanskritsamvad.com मूल्यम्-रू. ५/-

卐 वर्षम्-७ 卐 अंकः-०१ (१४५) 卐 १ जुलाईमासः २०१७ तः १५ जुलाईमासः २०१७ पर्यन्तम् 卐 विक्रमसंवत्-२०७४ 卐 सृष्टिसंवत्-१,९६,०८,५३,११५ 卐 पृष्ठम्-८

## विश्वस्य 180 देशेषु तृतीयान्तर्राष्ट्रीय योग दिवस्य आयोजनम्

### स्वामी रामदेवस्य सानिध्ये 55000जनाः योगं कृत्वां विश्वाभिलेखं संस्थापितवन्तः

नवदेहली/अहमदाबाद-शारीरिकमानसिकस्वास्थाय विश्वाय दत्तं 'योगक्षेत्रम्' तृतीयान्तर्राष्ट्रीय योग दिवसस्यरूपे विश्वस्य 180 देशेषु आयोजनमभवत्। सम्पूर्ण विश्वेन सह भारतस्य सर्वेषु





क्षेत्रेषु अपि ''योगदिवसस्य' डण्डिमोद्घोषमासीत्। सर्वे देशवासिनः। अस्मिन् सोत्साहसं भागं गृहितवन्तः।

अस्मिन् अन्तर्राष्ट्रीय योग दिवसे योगगुरुः बाबारामदेवस्य सानिध्ये 55000 जनाः अहमदाबाद नगरे एकैव स्थाने योगं कृत्वा विश्वाभिलेखं संस्थापितवन्तः। गुजरातसर्वकारः पतञ्जलि योगपीठयोः च संयुक्त तत्त्वावधाने जी.एम.डी.सी क्रीडाक्षेत्रे 18 तः 21 जून यावत् आयोजित अस्मिन् योग शिविर 5 लक्ष जनाय योगाभ्यास प्रशिक्षणस्य लक्ष्यमासीत् विदितं भवेत् यत् अस्मात् पूर्वं देहल्याः राजपथे 21जून 2015 तमे शेषभागः द्वितीयपुटे

## आर्थिक स्वतन्त्रायै देशे समानवस्तु सेवाकरञ्च (जीएसटी) आधत्तम्

नवदेहली। नवभारतस्यनिर्माण आर्थिक कर समानतायाः दिशि-अन्ततः समान वस्तु सेवाकरञ्च (जीएसटी) आधते। शुक्रवारमध्यरात्री 12 वादनतः संसदः ऐतिहासिक केन्द्रीय कक्षे राष्ट्रपति प्रणव मुखर्जी प्रधानमन्त्री श्री नरेन्द्रमोदी च एकसहैव पिञ्ज समीकृत्वा जीएसटी करस्य शुभारम्भं कृतवन्तौ। राष्ट्रपति श्री प्रणवमुखर्जी-अवोचत् यत् इदानीम् देशार्थिक स्तरे सूत्रैके बद्धमवभवत्। देशे चलायमानः 17 भिन्न-भिन्न कराणां समस्या समाप्ता जाता। स्वसम्बोधने श्री नरेन्द्र मोदी अकथयत् यत् जीएसटी एकं सरलं करमस्ति। ते-अकथयन यत् उपलब्धिरैषा कस्यापि



दलैकस्यसर्वकारस्य वा नास्ति। अपितु सर्वेषां देशवासिनां प्रयासानां सुफलमस्ति। अवसरेऽस्मिन् यत्र कांग्रेससहितमनेके विपक्षीदलाः अस्य विरोधं कृतवन्तः तत्रैव रतनटाटा लतामंगेशकर-अमिताभबच्चनसुदृशाः प्रमुखाः विभूतयः उपस्थिताः आसान्। जीएसटी प्रावधाने निम्नमध्यमवर्गयोः उपयोगे आगतवत्यः अधिकांशवस्तुषु 'जीएसटी' शून्यैवस्ति। मन्यते यत् जीएसटी संस्थापनेन सेवाक्षेत्रस्येतोऽपि विस्तारं भविष्यति येनास्य क्षेत्रे इतोऽपि अवसरं वर्धयिष्यन्ते।

जीएसटी संस्थापनान्तरम् विभिन्न वस्तुषु सेवानां च मूल्यवृद्धि हेतु संशयोऽपि वर्तते परञ्च सुस्पष्टमिदं यत् करस्योऽपरि कर व्यवस्थासमाप्यनन्तरं वस्तुमूल्यदरवृद्धिषु न्यूनता आगमिष्यति। येनोपभोकृतेभ्यः लाभः भविष्यति। अनेन करचार्यकर्मसुरपि न्यूनता भविष्यति सर्वकारस्य च राजस्वे वृद्धि भविष्यति। अनेन सर्वकारस्य पार्श्वे शिक्षास्वास्थ्ययातायातस्य क्षेत्रे व्ययार्थं पर्याप्तं धनं भविष्यति। येनजनसम्मानयेभ्यः लाभः भविष्यति।

## दिल्ली संस्कृत अकादमी संस्कृत साहित्ये उत्कृष्ट योगदानाय विदुषां सम्मानं कृतवती

नवदेहली। दिल्ली संस्कृताकादमीसंस्कृत साहित्यस्य क्षेत्रे-उत्कृष्टयोगदानाय देशस्य 11 साहित्यकारान् सम्मानं कृतवती। देहली सचिवालयस्य सभागारे-आयोजितसंस्कृतसाहित्यसेवासम्मानसमारोहस्याध्यक्षतां कुर्वन्तः अकादम्याः अध्यक्षः प्रो. गणेश दत्त शर्मा महाभागेनकथितं यत् सम्मानिताः-विद्वांसः न केवलं देशस्यसंस्कृतिसंभ्यतायाः चिन्तनं कृतवानापितु विश्वस्तरे संस्कृतिसभ्यतायाः च मार्गदर्शनमपि कृतवन्तः। शेषभागः तृतीयपुटे






**प्रथमपुटस्य शेषभागः**

**विश्वस्य 180 देशेषु...**

वर्षे प्रधानमन्त्री श्री नरेन्द्र मोदीनः 36000 जनैः सह योगं कृत्वा विश्वाभिलेखस्य संस्थापनं कृतमासीत्। अवसरेऽस्मिन् राष्ट्रपति श्री प्रणवमुखर्जी राष्ट्रपति भवने प्रधानमन्त्री श्री नरेन्द्रमोदी च लखनऊ नगरस्य रमाबाई अम्बेडकर क्रिडाक्षेत्रे योग कार्यक्रमे भागं गृहितवन्तौ।

अस्य तृतीय विश्वयोगदिवसस्य डिण्डिम उद्घोषं भारतमतिरिच्य सम्पूर्णे विश्वे अपि आसीत्। ऋषिकेषस्य परमार्थ निकेतनस्य परमाध्यक्ष स्वामी चिदानन्द सरस्वती महाराजः योगदिवसे संयुक्तराष्ट्रसंघमुख्यालये संघ पदाधिकारिभिः पश्चिमदेशानां साधकैः सह वैदिकमन्त्रोचारयुक्तवातावरणे भारतस्य प्राचीन योग विद्यायाः प्रदर्शनं कृतवन्तः। उल्लेखनीयमस्ति यत् योगं विश्वस्तरेस्थापने योगगुरुः बाबा रामदेवस्य प्रधानमन्त्रिणः श्री नरेन्द्र मोदी महाभागानाम् अग्रणी भूमिका अस्ति।

NATION TAX MARKET

COMMITTED TO TAXPAYER SERVICES

> जीएसटीभ्यः सिद्धाः भक्तु। >>

वस्तु सेवाकरञ्च ( जी.एस.टी. ) 1 जुलाई 2016 तः प्रारम्भः भविष्यति

जीएसटी लघुव्यापारिभ्यः/निर्मातृभ्यः/जलपानगृहेभ्यः समाश्वास दास्यति।

निर्माता/सेवाप्रदाता।व्यापारिणः येषां वार्षिक संकलितं व्यापारं रु.28 लक्ष तः न्यूनमस्ति तेभ्यः जीएसटी प्रदानस्य आवश्यकता नास्ति। तेभ्यः पंजीकरणस्य आवश्यकताऽपि नास्ति।

येषां वार्षिकं संकलितं व्यापारं रु. 75 लक्ष यावत् अस्ति ते संरचना योजनायाः अन्तर्गते लाभ प्राप्तुं शक्यते यस्मिन् करस्य विभाजनं एवमेवस्ति–




संरचना योजनायै जीएसटी मूल्यम्

| व्यापारिणः- 1 प्रतिशतम् | निर्मातरः- 2 प्रतिशतम् | जलपानगृहम्:-5 प्रतिशतम् |
|---|---|---|

- सेवाक्षेत्रे संरचनायोजना केवलं जलपानगृहेभ्यः एवोपलब्धमस्ति।
- कलञ्ज कलञ्जनिर्मितंञ्च विकल्पेभ्यः शालेयमासलपयोहिम अन्य खादायोपयुक्तं हिमम् कोकोयुक्तं उत च न एतेषां निर्मातृभ्यः संरचनायोजनोपलब्धा नास्ति।
- यो क्रय विक्रयकिः संरचना योजनायाः विकल्पं परिचुनोति। तेभ्यः केवलं त्रिमासिकायकरविवरणं संकलितव्यापारस्य विवरण सहितंमग्रेस्थापनं करणीयम्। विवरण बीजकस्यावश्यकता नास्ति। केवलमापूर्ति देयकमेवपर्याप्तं भविष्यति।
- लघुकरदातृभ्यः स्वायकरदाने एच.एस.एन. कुटक्रमांकस्यावश्यकता न भविष्यति।
- अनेन विकल्पेनेनपुटकरक्रेडिट नैवनेतुं शक्यते नतु अग्रे उत्तीर्ण कर्तुं शक्यते।
- ऑनलाइन पंजीकरणे आयकर करदानं पुनप्राप्ति प्रक्रियाम्यान्यभ्यः विलम्बं हस्तक्षेपं च न्यूनं भविष्यति।
- अनुपालनस्य भारं न्यूनं भविष्यति।
- जीएसटीमध्ये वृत्तिकर्मकरेभ्यः सहायतायै वृत्तिकार्य हेतु विशेष व्यवस्था वर्तते।

* सीमेषा असमारुणाचलमणिपुरमिजोरमनागालैंड त्रिपुरासिक्किमोत्तराखण्डहिमाचलप्रदेशाय च 10 लक्षरुप्यकाणि वर्तते।

# सीमेषा असमारुणाचलमणिपुरमेघालयमिजोरम नागालैंडत्रिपुरासिक्किमहिमाचलप्रदेशाय च 50 लक्ष रुप्यकाणि वर्तते।

संरचना योजनायै विषयायधिक विवरणाय www.cbec.gov.in अपरि गच्छतु।

davp 15502/13/0058/1718

जीएसट संबंधित कस्यामपि ज्ञानाय @askGST_GoI उपरि ट्वीट करोतु।

केन्द्रीय उत्पाद सीमा शुल्क बोर्ड च राज्यनां/ संघराज्यक्षेत्राणां वाणिज्यिक कर विभागः www.cbec.gov.in

प्रथमपुटस्य शेषभागः

## दिल्ली संस्कृत अकादमी संस्कृत साहित्ये....

समारोहस्यमुख्यातिथिः देहली सर्वकारस्य पर्यटनसलिलसमाजकल्याणकलासंस्कृति भाषामन्त्री च श्री राजेन्द्र पाल गौतमः विद्वांस सम्मानितं कुर्वन्तः अवदन् यत् संस्कृत भाषायां विशालज्ञानं विज्ञानं च निहितमस्ति



भारतीयसंस्कृतेः विश्वस्यानेकाः संस्कृतयः- उत्पन्ना जाता।

सम्मानितेषु विद्वत्सु वर्ष 2015-16 वर्षेभ्यः हरिद्वारात्-प्रो. वेदप्रकाशशास्त्री, होशियारपुरतः प्रो.जगदीश प्रसाद सेमवाल देहल्याः डॉ. रामसलाही द्विवेदी डॉ. लक्ष्मीश्वर झा उत्तराखण्डस्य च डॉ. सुधारानी पाण्डेय सम्मानं प्राप्तवन्तः। अथ च वर्ष 2016-17 वर्षाभ्यां वाराणसीतः प्रो. भागीरथीप्रसाद त्रिपाठी हरिद्वारतः डॉ. महावीर अग्रवालः देहल्याः प्रो. महेश प्रसाद सिलोडी वाराणसी तः डॉ. दीनानाथ पाण्डेय, असामतः डॉ. गोकुलेन्द्र नारायणदेवः सम्मानं प्राप्तवन्तः। अस्यैवसह वाराणसीतः प्रो. रामहर्ष सिंह वर्ष 2011-12 वर्षाय सम्मानं प्राप्तवान्। अन्ते देहली सर्वकारस्य भाषा सचिवः श्री वी अव्रात्म सर्वेषां धन्यवादं ज्ञापितवन्तः।

## जामिया विश्वविद्यालययपि संस्कृतविभागस्यारम्भः



नवदेहली - संस्कृत भाषायाः परवर्तित दृष्टिकोणमविक्ष्य अधुना देहलिस्थ जामियामिलिया इस्लामिया विश्वविद्यालययपि संस्कृत विभागस्य शुभारम्भः जातः । इदानीं छात्राः संस्कृतं विषये अपि स्नातक स्नातकोत्तरं च कर्तुं शक्यन्ते । विदितं भवेत् यत् प्रो. तलत अहमदस्य कुलपति नियुक्तयानन्तरमेव संस्कृत विभागस्थापनायाः प्रक्रिया प्रारम्भः अभवत् । विभागे सर्वप्रथमं डॉ. गिरिश चन्द्र पन्त महाभागानां नियुक्ति जाता। उत्तराखण्डस्य चम्पावत जनपदस्य निवासी डा.पन्त दिल्ली विश्वविद्यालयस्य देशबन्धु महाविद्यालये 26 वर्षाणि यावत् संस्कृतपाठयत्। 37 एम फिल , पी.एच.डी. कारितवन्तः डॉ. पन्त छात्रेषु बहु लोकप्रियं वर्तते। तेषां कथनमस्ति यत् संस्कृते वृत्याणामवसराणि सन्ति। अतः अत्र पाठ्यक्रमे नूतन विषयाणां संयोजनं कृतमस्माभिः। प्रथम वर्षैकं पत्रं वाचनस्य भविष्यति । साहित्यव्याकरणंशास्त्रीयवैदिकसंस्कृतं च एतेषां विषयाणामपि पाठ्यक्रमे पाठनं भविष्यति । स्वयं प्रबन्धनम् भगवद्गीता च , संस्कृत पत्रकारिता प्राचीन ग्रन्थेषु स्थापत्य कलायाः अपि एकं प्रश्नपत्रं भविष्यति । संस्कृततकनिक्यायाः कृते संगणकप्रयोगशालापि भविष्यति ।



## दिल्ली सर्वकारः पालिभाषाकादमी स्थापयिष्यति



देहली। सर्वकारः पालिभाषां वर्धयितुं पालि-अकादम्याः गठनं करिष्यति। सर्वकारः कलासंस्कृतिभाषा विभागं चास्य दायित्वं प्रदत्तम्। देहल्याः कलासंस्कृति भाषाविभागस्य च मन्त्री राजेन्द्रपालगौतमः अकथयत् शीघ्रमेव योजनामन्तिमं रुपं प्रदास्यामः। ते-अकथयम् यत् अधुना देहली विश्वविद्यालयैवास्य शिक्षा दीयते।

प्राचीनसमये पालि उत्तरभारतस्य जनानां भाषासीत्। या बिहार हरियाणाराजस्थान उत्तर-प्रदेशमध्यप्रदेशस्यसार्धं नेपालदेशस्यापि जनभाषासीत्। अस्यां भाषायामेव बहुग्रन्थानि रचितानि। ग्रन्थैषा बौद्धधर्मसम्बद्धमस्ति। बौद्ध त्रिपिटकानां भाषा आसीत्। देहली सर्वकारः भाषामस्यां वर्धयितु प्रयासरतो वर्तते। अस्यातिरिच्य देहली सर्वकारः महापुरुषाणां जीवनाधारित नाटकानां मञ्चनमपि करिष्यति।

मन्त्री राजेन्द्रपाल गौतमः अकथयत् यत् माता सावित्री बाईफूले देशस्य प्रथमा शिक्षिका आसीत्। सा तस्मिन् समये महिलानां कृते शिक्षण क्षेत्रे बहुयोगदानं दत्तवती। परन्तु तासामयोगदानं जनाः अद्य न स्मरन्ति। सर्वकारः इच्छति यत् एतादृशान् महापुरुषाणां जीवनविषये जनान् प्रबोधयितुमिच्छ। सि। सर्वकार विद्यालयी बालानपि अस्यसहयोगयिष्यति






### लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।


# राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्,

गुणवत्ताप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितम्)

56-57, संस्थागतक्षेत्रम्, जनकपुरी, नवदेहली -110 058

**विशिष्टसंस्कृतसेवाव्रतीसम्मानप्रदानाय नामनिर्देशनार्थ आमन्त्रणसूचना**

राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षं "**विशिष्टसंस्कृतसेवाव्रतीसम्मानः**" तादृशविद्वद्भ्यः प्रदीयते ये संस्कृतक्षेत्रेतराः भूत्वापि पारम्परिकशास्त्राणां गभीरानुशीलनेन शोधमौलिकसाहित्यसर्जनेन तथा संस्कृतसम्बद्धकलानैपुण्येन च पारम्परिकशास्त्रेषु संस्कृतानुसन्धानाध्ययनक्षेत्रेषु महत्त्वपूर्णं योगदानं विदधानाः संस्कृताय दत्तजीवनाः वेविद्यन्ते।

प्रतिवर्षं संस्कृतसप्ताहोत्सवस्य मुख्यसमारोहे (श्रावणीपूर्णिमायाम्) अधिकाधिकं त्रिभ्यः विद्वद्भ्यः पृथक्-पृथक् प्रशस्तिपत्रेण सह एकलक्षपरिमितधनराशिः सेवाव्रतीसम्मानरूपेण प्रदीयते। अस्मिन् वर्षे संस्कृतसप्ताहोत्सवः 4 तः 10 अगस्त, 2017 पर्यन्तम् आयोजयिष्यते। तदर्थं भारतदेशस्य सर्वेषां विश्वविद्यालयानां कुलपतयः तथा संस्कृतविभागप्रमुखाः प्रार्थ्यन्ते यत् संस्कृतक्षेत्रेतराः भूत्वा अपि संस्कृतार्थं विशिष्टं योगदानं विदधानानां विदुषां नामानि तेषां पूर्णविवरणेन (सप्रमाणम्) सह 20.07.2017 (5.00 वादनं) पर्यन्तं संस्थानं प्रति पोस्टल द्वारा अथवा निम्नलिखितं ई-मेल संकेतं प्रति प्रेषयितुं शक्नुवन्ति-

**Email:- rskspvc@yahoo.com**

20 जुलाई, 2017 दिनाङ्कात् पश्चात् प्राप्तानि नामानि सेवाव्रतीसम्मानार्थं नैव परिगण्येरन्।

**-कुलसचिवः**

# सम्पादकीयम्

## आर्थिकस्वतन्त्रतादर्शकर संहिताश्च

राज्येन जनताभ्यः करसंग्रहणस्य प्रथा कियत् पुरातनी-अस्यकोऽपि-ऐतिहासिकं प्रमाणं नास्ति। सम्भवतः शासनव्यवस्थायाः प्रभावी भवने सहैव शासनव्यवस्थां चालयितुं करसंग्रहणस्य प्रथा प्रारम्भा जाता। बहवः एतादृशाः अपि दृष्टान्ताः प्राप्यन्ते यस्मिन् क्रुरशासकैः जनसामान्यं त्रस्तकरणाय करं शस्त्ररुपेण प्रयोगं कृतमासीत्। वस्तुतः करनिर्धारणं तात्कालिकशासनव्यवस्थायाः दर्पणमपिरासीत्। आचार्य चाणक्यः चन्द्रगुप्त मौर्यस्य शासनकाले आदर्शकर संहितायाः व्यवस्थां स्थापयन्तः अवदन् यत् उत्पादनमूल्यस्य 5 प्रतिशतातमधिकं करं न भवेत्। यदि-अधिकं करं भवति तदा तदमानवीयं वर्तते। भारतदेशैतिहासिक शासनव्यवस्थासहैव करसंग्रहव्यवस्थायामपि बहुनि परिवर्तनानि जातानि। जातिगतदृष्टिकोणमपि परिवर्तनमभवत्। मुगल शासनकाले हिन्दूजनेषु जजियाकरः अस्योदाहरणमस्ति। आड्ग्ल शासनकालेऽपि करनिर्धारणस्यादर्श व्यवस्था नाभवत्।

स्वतन्त्रता प्राप्त्यान्तरम् राजनैतिक व्यवस्थादर्श कर प्रणाल्याः भावं नावगतम्। परिणामतः समाजः निध नतासमानताभ्रष्टाचारं प्रति अग्रसरमभवत्।

वर्तमान बीजेपी शासनव्यवस्था स्वैकसाहसिकनिर्णयेन देशे समान कर व्यवस्था संस्थापतयित्वास्यां दिशि-एकमुल्लेखनीयं कार्यं कृतम्। विगते जनसामान्यः अनेकविधकरकारणात् त्रस्तमासीत् विभिन्न प्रदेशेषु भिन्न-भिन्न कर व्यवस्था कारणातनेकाः समस्याः आसन्। जीएसटी कर व्यवस्थायाः सुपरिणामाः भविष्यन्ति, एषा सम्भावनास्ति। देशस्याधिकांशतः राजनैतिकः, सामाजिक व्यापारिणः च सहैव जनसामान्यः अस्य स्वागतं कृतवन्तः। अनेनकर व्यवस्थायाः आदर्शकर संहितायाः सूत्रपातं भविष्यति।

## वेदामृतम्

परमेश्वर प्रार्थना करने योग्य क्यों है, यह विषय अगले मन्त्र में प्रकाशित किया है–

**एमाशुमाशवे भर यज्ञश्रियं नृमादनम्**
**पतयन्मन्दयत् सखम्।।७।।**

अर्थ–ईश्वर पुरुषार्थी मनुष्य पर कृपा करता है, आलस करने वाले पर नहीं, क्यों जब तक मनुष्य ठीक-ठीक पुरुषार्थ नहीं करता तब तक ईश्वर की कृपा ओर अपने किये हुए कर्मों से प्राप्त हुए पदार्थों की रक्षा भी करने में समर्थ कभी नहीं हो सकता। इसलिए मनुष्यों को पुरुषार्थी होकर ही ईश्वर की कृपा का भागी होना चाहिए।।7।।

फिर भी परमेश्वर ने सूर्यलोक के स्वभाव का प्रकाश अगले मन्त्र में किया है–

**अस्य पीत्वा शतक्रतो घनो वृत्राणामभवतः।**
**प्रावो वाजेषु वाजिनम्।।८।।**

अर्थ–इस मन्त्र में लुप्तोपमालङ्कार है। जैसे जो मनुष्य दुष्टों के साथ धर्मपूर्वक युद्ध करता है उसी का ही विजय होता है और का नहीं। तथा परमेश्वर भी धर्मपूर्वक युद्ध करने वाले मनुष्यों का ही सहाय करनेवाला होता है। औरों का नहीं।।8।।

**तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो।**
**धनानामिन्द्र सातये।।९।।**

अर्थ-जो मनुष्य दुष्टों को युद्ध से निर्बल करता तथा जितेन्द्रिय व विद्वान होकर जगदीश्वर की आज्ञा का पालन करता है, वही उत्तम धन वा युद्ध में विजय को, अर्थात सब शत्रुओं को जीतनेवाला होता है।।9।।

फिर भी वह परमेश्वर कैसा है और क्यों स्तुति करने योग्य है। इस विषय का प्रकाश अगले मन्त्र में किया है।

**यो रायो३वनिर्महान्सुपारः सुन्वतः सखा।**
**तस्मा इन्द्राय गायत।।१०।।**

अर्थ-किसी मनुष्य को केवल परमेश्वर की स्तुति मात्र ही करने से सन्तोष न करना चाहिए, किन्तु उसकी आज्ञा में रहकर और ऐसा समझकर कि परमेश्वर मुझको सर्वत्र देखता है, इसलिए अधर्म से निवृत्त होकर और परमेश्वर के सहाय की इच्छा करके मनुष्य को सदा उद्योग ही में वर्तमान रहना चाहिए ।।10।।

उस तीसरे सूक्त की कही हुई विद्या से, धर्मात्मा पुरुषों को परमेश्वर का ज्ञान सिद्ध करना तथा आत्मा और शरीर के स्थिर भाव, आरोग्य की प्राप्ति तथा दुष्टों के विजय और पुरुषार्थ से चक्रवर्ती राज्य को प्राप्त होना, इत्यादि अर्थ द्वारा इस चौथे सूक्त के अर्थ की सङ्गति समझनी चाहिए।

यह चौथा सूक्त और आठवाँ वर्ग समाप्त हुआ।।

# व्याकरणे क्रयादिनियमः

-ललितेश गुप्ता
संस्कृतविभागः, दिल्लीविश्वविद्यालयः

पाणिनीयव्याकरणे आचार्यपाणिनिः व्याकरणशास्त्रस्य सरलतायै अनेकसंज्ञाः प्रयुज्यते, यासु गुणवृद्धी अपि अन्यतमे।

**गुणवृद्धयोः विधि**

काशिकाकारः विधीयते - 'वृद्धि'शब्दः संज्ञात्वेन विधीयते प्रत्येकम् आदैचां। (आत् = आ, ऐच् = ऐ, औ) वर्णानां सामान्येन तद्भावितानाम्, अतद्भावितानां च।[1] जितेन्द्रबुद्धिमहोदयः अत्र भणति-**ते तद्भाविताः ये वृद्धिशब्देन उत्पादिताः।**[2] यथा-'औपगवः' (उपगोरपत्यम्), अत्र 'उपगु + अण्', इतिस्थितौ वृद्धि भूत्वा 'औपगवः' सिध्यते, तस्माद् तद्भावितम्। ततोऽन्येऽतद्भाविताः।[3] यथा - शालीयः (शालायां भवः), अत्र तु 'शाला', अस्मिन् पदे पूर्वतः एव वृद्धिसंज्ञकशब्दः 'आ' विद्यते तस्मात् अतद्भावितम् । अग्रे काशिका उद्धरति 'गुण'शब्दः संज्ञात्वेन विधीयते प्रत्येकम् अदेङां (अत् =अ, एङ्=ए, ओ) वर्णानां सामान्येन तद्भावितानाम् अतद्भावितानां च।[4] तद्भावितानाम् उदाहरणमहित 'चेता', अत्र 'चि तृ' इतिस्थितौ गुणः भूत्वा 'चेता' इति भवति। अतद्भावितानाम् उदाहरणं 'पचन्ति' अत्र 'पच+अन्ति' इतिस्थितौ पररूपः गुणः तु भवति, परन्तु गुणः पूर्वतः एव वर्तते।

**गुणवृद्धयोः स्थाननिर्धारणम्**

भट्टोजिदीक्षितमहोदयः निर्धार्यते यत् गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते, तत्र इकः इति षष्ठ्यन्तं पदम् उपतिष्ठते।[5] यथा 'भवति', अत्र 'भू अति' इतिस्थितौ 'ऊ' इकः स्थाने 'ओ' गुणः भवति। 'कारः', अत्र 'कृ + अ (घञ्)' इतिस्थितौ 'ऋ' इकः स्थाने रपरः भूत्वा 'आर' वृद्धि भवति। अत्र पतञ्जलिः वार्तिकरूपे वदति – **इग्ग्रहणम् आत्वसन्ध्यक्षरव्यञ्जननिवृत्यर्थम्**[6] यथा – 'ग्लायति' अत्र 'ग्लै' इतिस्थितौ 'ऐ' इक् न वर्तते, तस्माद् गुणः न भवति। 'यानम्' अत्र 'या इतिस्थितौ 'आ' इक् न भवति। अस्य अपवादरूपे सिद्धान्तकौमुद्यां विधानं दीयते – धात्वंशलोपनिमित्ते आर्धधातुके परे इको गुणवृद्धी न स्तः।[7] यथा 'लोलुव' अत्र 'लोलू अच्' अस्मात् स्थितेः पूर्वं अचि परतः यङस्य लुक् अभूत्। तदेवम् अचं निमित्तं मत्वा गुणः प्राप्नोति, तद् न भवति। महाभाष्येऽपि एतत् समर्थतयतः क्ङिति ये गुणवृद्धी प्राप्नुतः ते न भवतः।[8] यथा – 'चितः' अत्र 'चि + क्त (त)', इतिस्थितौ चिधातोः गुणः प्राप्नोति, 'क्त =त' प्रत्ययः कित् अस्ति, तस्मात् 'क्ङिति च' अनेन निषेधो भवति। दीधोवेव्योरिटश्च ये गुणवृद्धी प्राप्नुतस्ते न भवतः।[9] यथा 'आदीध्यनम्', अत्र 'आदीधी + अन' इतिस्थितौ दीधीधातोः गुणः प्राप्नोति, परं न भवति।

**गुणवृद्धयोः मुख्यप्रयोगस्थलम्**

सिद्धिकौमुदी भणति यत् अवर्णादचि परे पूर्वपरयोः एको गुणादेशः स्यात् संहितायाम्।[10] यथा –'रमेशः' अत्र 'रमा+ईशः' इतिस्थितौ 'आ, ई' तयोः स्थनो 'ए' गुणः एकादेशः भवति। पुनश्च तत्र उद्धरति-आत् ऐचि परे वृद्धिः एकादेशः भवति।[11] यथा – 'कृष्णकैत्वम्' अत्र 'कृष्ण + एकत्वम्', इतिस्थितौ (अ, ए), तयोः स्थाने वृद्धिः 'औ' एकादेशो भवति। एषः वृद्धिः गुणस्य अपवादः अपि अस्ति।

**पररूपयङ्यङ्लुकभसंज्ञाविषयेषु गुणः**

अकारात् अपदान्तात् गुणे परतः पररूपम् एकादेशो भवति।[12] यथा –'पचति' अत्र 'पच+अति' इतिस्थितौ चकारोत्तरात् अपदान्तात् अकारात् गुणे 'अ' परे पररूपः गुणः 'अ' भवति। यङि, यङ्लुकि च इगन्तस्याभ्यासस्य गुणो भवति।[13] यङि-'चेचीयते', अत्र 'चि चि य' इतिस्थितौ अभ्यासस्य 'चि' अस्य गुणः 'चे' भवति, यङि (य) परतः। यङ्लुकि-'जोहवीति'-अत्र 'जुहु+ति' इतिस्थितौ यङ्लुकि सति अभ्यासस्य 'जु' अस्य गुणः 'जो' भवति। उवर्णान्तस्य भस्य गुणो भवति तद्धिते परतः ।[14] यथा – 'बाभ्रव्यः', अत्र 'बाभ्रु+य', इतिस्थितौ भसंज्ञकस्य 'ब्राभ्रु' अस्य 'उ' स्थाने 'ओ' गुणः भवति। 'यचि भम्', अनेन 'बाभ्रु' अस्य भसंज्ञा भवति।

**परस्मैपदपरकस्य इडादिसिचः वृद्धिः**

काशिकाकारः भणति – परस्मैपदपरे सिचि परतः इगन्तस्य अङ्गस्य वृद्धि भवति।[15] यथा – 'अचैषीत्' अत्र' 'अ+चि+सीत्', इतिस्थितौ इगन्तस्य अङ्गस्य 'इ' अस्य वृद्धिः 'ऐ' भवति, परस्मैपदपरके (तिप् = त्) सिचि परतः। महर्षिपतञ्जलिः अत्र स्पष्टीकरोति **अन्तरङ्गम् अपि गुणम् एषां वृद्धिर्वचनाद बाधते।**[16] दीक्षितमहोदयः प्रस्तूयते यत् अतः समीपौ यौ ल्रौ तदन्तस्य अङ्गस्य अतः वृद्धिः स्यात् परस्मैपदपरे सिचि।[17] यथा- 'अक्षारीत्' अत्र 'अक्ष + रीत्' इतिस्थितौ ल्रौ समीपस्य अतः वृद्धिः भवति। काशिकायामपि विधानं प्राप्नोति – वदव्रजोः हलन्तानाम् अङ्गानाम् अचः स्थाने वृद्धिः भवति सिचि परस्मैपदे परतः।[18] यथा- 'अवादीत्' अत्र 'वद् + ईत', इतिस्थितौ 'वद्'अङ्गस्य अतः स्थाने वृद्धिः भवति। काशिकाकारः अग्रे वदति – इडादौ सिचि हलन्तस्य अङ्गस्य वृद्धिः न भवति।[19] यथा – 'अदेवीत्' अत्र 'अदिव् + ईत्' इतिस्थितौ हलन्तस्य अङ्गस्य 'दिव्' अस्य इकारस्य वृद्धिः न भवति। अन्यच्च – हमयान्तस्य क्षणादेः ण्यन्तस्य श्वयतेः एदितश्च वृद्धिः न स्यात्, इडादौ सिचि।[20] यथा- 'अग्रहीत्' अत्र 'अग्रह्+ईत्' इतिस्थितौ हकारान्तस्य अङ्गगस्य 'ग्रह्', अस्य वृद्धिः न भवति। ऊर्णोतेः इडादौ सिचि परस्मैपदरे पक्षे गुणः।[21] यथा – 'प्रौर्णवीत्, प्रौर्णावीत्' अत्र – 'ऊर्णु + ईत्' इतिस्थितौ पक्षे गुणः, पक्षे वृद्धिश्च भवति। हलादेर्लघोः अकारस्य इडादौ परस्मैपदपरे सिचि वृद्धिर्वा स्यात्।[22] यथा-'अकणीत्' अत्र 'कण्+ईत्' इतिस्थितौ हल् 'क्' आदेः लघोः अकारस्य वृद्धिः भवति।

**मिद्मृजधात्वोः जुसि च परतः गुणवृद्धी**

मिदेः इको गुणः स्यात् इत्संज्ञकशकारादौ प्रत्यये।[23] यथा-मेद्यति अत्र 'मिद्+श्यन्' इतिस्थितौ 'मिद्' अङ्गस्य गुणः भवति, शिति = 'श्यन् = य' प्रत्यये परतः। अजादौ जुसि इगन्तस्य अङ्गस्य गुणः स्यात्।[24] यथा 'अजुहवुः' अत्र 'अजुहु + उस्' इतिस्थितौ गुणः भूत्वा 'अजुहो + उस्', तदनन्तरं अवादेशादयः भूत्वा 'अजुहवुः' भवति। मृजेरिको वृद्धिः स्यात् धातुप्रत्यये परे।[25] यथा – 'मार्ष्टा' अत्र 'मृज्+तृच्' इतिस्थितौ मृजः इकः स्थाने रपरः भूत्वा 'आर्' वृद्धिः अभूत्।

**णिति, ञिति, किति प्रत्यये परतः वृद्धिः**

ञिति णिति च प्रत्यये परे अजन्ताङ्गस्य वृद्धिः भवति।[26] यथा-'कारः' अत्र 'कृ+अ (घञ्)', इतिस्थितौ रपरः भूत्वा 'आर्' वृद्धिः भवति। उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परतः।[27] यथा-'पाकः' अत्र 'पच्+अ (घञ्)', इतिस्थितौ उपधायाः अकारस्य वृद्धिः 'आ' भवति। ञिति णिति च तद्धिते परे आचाम् आदेः अचः वृद्धिः स्यात्।[28] यथा 'गार्ग्यः', अत्र 'गर्ग + यञ् (य)' इतिस्थितौ आदेः अकारस्य वृद्धिः भवति, तद्धिते परतः अङ्गस्य आचाम् आदेः अचः स्थाने वृद्धिर्भवति।[29] यथा अत्र – 'नाडायनः' – 'नड्+आयन (फक्)', इतिस्थितौ आदेः अकारस्य वृद्धिः भवति।

**सार्वधातुकार्धधातुकयोः परतः गुणवृद्धी**

सार्वधातुकार्धधातुकयोः परयोः इगन्तस्य अङ्गस्य गुणः स्यात्।[30] यथा- 'भवतः' अत्र 'भू + अतः' इतिस्थितौ 'उ' अस्य गुणः 'ओ' भवति, सार्वधातुकप्रत्यये (श=अ) परतः। जागर्तेर्गुणः स्यात् विचिण्णलङिभ्यो अन्यस्मिन् वृद्धिविषये प्रतिषेधविषये च।[31] यथा – 'जागरयति' अत्र 'जागृ+णिच् (इ)' इतिस्थितौ कित्वत्वात् गुणनिषेधः प्राप्नोति, परम् एतत् सूत्रं गुणः करोति। पुगन्तस्य लघूपधस्य च अङ्गस्य इको गुणः स्यात्सार्वधातुकार्धधातुकयोः।[32] यथा – 'व्लेपयति' अत्र 'व्लीप् +इति' इतिस्थितौ पुगन्तस्य अङ्गस्य 'व्लीप्' अस्य गुणः भवति सार्वधातुकप्रत्यये 'तिप्' परतः। अभ्यस्तसंज्ञकस्य अङ्गस्य लघूपधस्याजादौ पिति सार्वधातुके गुणो न भवति।[33] यथा नैनिजानि' अत्र 'निनिज्+आनि', इतिस्थितौ अभ्यस्तस्य 'नि' अस्य गुणः भवति अजादौ पिति सार्वधातुके 'आनि' परतः। भू, सू, एतयोः सार्वधातुके तिङि परे गुणो न स्यात्।[34] यथा 'अभूत्' अत्र 'अभू+त् (तिप्)' इतिस्थितौ गुणः न भवति, सार्वधातुके तिङि (तिप्) परतः। अकारान्तस्य अङ्गस्य वृद्धिर्भवति लुकि सति हलादौ पिति सार्वधातुके।[35] यथा – 'यौति'-अत्र 'यु+तिप्' इतिस्थितौ उकारान्तस्य अङ्गस्य यु (उ) अस्य वृद्धिः 'औ' भवति, शपः लुकि सति, 'अदिप्रभृतिभ्यः शपः' अनेन सूत्रेण, हलादौ पिति सार्वधातुके 'तिप्' परतः। ऊर्णोतेर्विभाषा वृद्धिर्भवति हलादौ पिति सार्वधातुके।[36] यथा- 'प्रोर्णौति', 'प्रोर्णोति'। अत्र 'प्र+ऊर्णु+ति' इतिस्थितौ विकल्पेन वृद्धिः 'औ' भवति, 'णु' अस्य 'उ' स्थाने, हलादौ पिति सार्वधातुके 'तिप्' परतः। ऊर्णोतेर्गुणः स्यात् अपृक्ते हलादौ पिति सार्वधातुके।[37] यथा 'प्रोर्णोत्' – अत्र 'प्र+उर्णु+तिप् (त)' इतिस्थितौ 'णु' अस्य स्थाने 'ओ' गुणः भवति, अपृक्ते हलादौ पिति सार्वधातुके 'तिप्' परतः।

अतः भिन्नस्थानेषु भिन्नास्यवस्थाषु च वयं गुणवृद्धयोः विविधताम् अपश्याम।

**संदर्भसूची (Endnotes)**

[1] काशिका (1/1/1) (वृद्धिरादैच्) [2] न्यास (1/1/1) [3] न्यास (1/1/1) [4] काशिका (1/1/2) [5] सिद्धान्तकौमुदी (34) [6] महाभाष्य (1/1/3) (वा.) [7] सिद्धान्तकौमुदी (2656) (न धातुलोप आर्धधातुके) [8] महाभाष्य (1/1/5) (क्ङिति च) [9] काशिका (1/1/5) (दीधीवेवीटाम्) [10] सिद्धान्तकौमुदी (69) (आद्गुणः) [11] सिद्धान्तकौमुदी (72) (वृद्धिरेचि) [12] काशिका (6/1/97), (अतोगुणे) [13] काशिका (7/4/82), (गुणो यङ्लुकोः) [14] काशिका (6/4/146), (ओर्गुणः) [15] काशिका (7/1/1), (सिचिवृद्धि परस्मैपदेषु) [16] महाभाष्य 7/1/1 [17] सिद्धान्तकौमुदी (2330) (अतोल्रान्तस्य) [18] काशिका (7/2/3) (वदव्रजहलन्तस्याचः) [19] काशिका (7/2/4) (नेटि) [20] सिद्धान्तकौमुदी (2299) (ह्ययन्तक्षणश्वसजागृणिश्व्येदिताम्)

[21] कारिका (6/1/6) (ऊर्णोतेर्विभाषा) [22] सिद्धान्तकौमुदी (2284) (अतो हलादेर्लघोः) [23] सिद्धान्तकौमुदी (2346)(मिदेर्गुणः) [24] सिद्धान्तकौमुदी (241) (जुसि च ) [25] सिद्धान्तकौमुदी (2473) (मृजेर्वृद्धिः) [26] सिद्धान्तकौमुदी, (254) (अचोऽञ्णिति) [27] सिद्धान्तकौमुदी (2282) (अत उपधायाः) [28] सिद्धान्तकौमुदी (1075) (तद्धितेष्वचामादेः) [29] काशिका (7/2/118) (किति च) [30] सिद्धान्तकौमुदी (2168), (सार्वधातुकार्धधातुकयोः) [31] सिद्धान्तकौमुदी (248)(जाग्रोऽविचिणणल्ङित्सु) [32] सिद्धान्तकौमुदी (2189)(पुगन्तलघूपधस्य च) [33] काष्ठिका (7/3/87) (नाभ्यस्तस्याचि पिति सार्वधातुके) [34] सिद्धान्तकौमुदी (2224) (भूसुवोस्तिङि) [35] काशिका (7/3/89)(उतो वृद्धिर्लुकि हलि) [36] काशिका (7/3/90) (ऊर्णोतेर्विभाषा) [37] सिद्धान्तकौमुदी (2448) (गुणोऽपृक्ते)

# ‘मनोगतम्’ - इति ‘मनकी बात’

## कार्यक्रमस्य द्वितीयः संस्कृत-भाषिकानुवादः ]

## (प्रसारण-तिथिः 25.06.2017)



-संस्कृत-भाषान्तर-
द्वारा- डॉ.बलदेवानन्द सागर
Cell- 9810 5622 77
Email - baldevanand.sagar@gmail.com

ममप्रियाःदेश-वासिनः ! नमस्कारः।

ऋतुः परिवर्तते। अस्मिन्वर्षे निदाघस्य तापः अपि अधिकः आसीत्। परञ्च सुखदम् इदं वृत्तं यत् वर्षर्तुः काले एव सम्प्राप्तः। देशस्य अनेकेषु स्थानेषु मूसलाधार-वृष्टि-कारणात् सुदिनानि सञ्जातानि। वर्षायाः अनन्तरं प्रवहमानैः शीतलैः मन्द-समीरैः विगत-दिनानां आतापात् मुक्तिः अनुभूयते। अस्माभिः सर्वैः अपि अनुभूतं यत् जीवने कियती अपि व्यग्रता भवेत्, कियती अपि आततिः स्यात, भवतु नाम वैयक्तिकं जीवनं वा सार्वजनिकम् - वर्षायाः आगमनं हि अस्मदीयां मनसः स्थितिम् अपि परिवर्तयति।

अद्यत्वेभगवतः जगन्नाथस्य रथयात्रा-समुत्सवः देशस्य नाना-भागेषु राष्ट्रवासिनः सोल्लासं सश्रद्धञ्च समायोजयन्ति। साम्प्रतन्तु जगतः अपि केषुचित् स्थानेषु भगवतः जगन्नाथस्य रथयात्रा-महोत्सवः आमान्यते। अपिच, भगवता जगन्नाथेन साकमेव राष्ट्रस्य निर्धन-जनः संयुक्तोह्यस्ति। ये जनाः डॉ.बाबा-साहेब-अम्बेडकरस्य जीवनम् अधीतवन्तः, ते नूनम् अनुभूतवन्तः यत् सः भगवतः जगन्नाथस्य मन्दिरं एतद्-विषयिणीः परम्पराः च अतितरां प्रशंसति स्म। यतो हि अत्र सामाजिक-न्यायः, सामाजिकी च समरसता अन्तर्निहिते स्तः। वस्तुतस्तु भगवान् जगन्नाथः निर्धनानां देवता। तथा च, आङ्गल-भाषायाम् एकः शब्दः अस्ति - juggernaut। मन्ये, न्यूनाः एव अवगताः स्युः यत् अस्य अर्थः भवति- एतादृशः भव्यः रथः यस्य गतिः अप्रतिहता भवति, न कश्चन अपि एनम् अवरोद्धुं पारयति। juggernaut इति शब्दस्य शब्दकोशीयेन अर्थेण अपि ज्ञायते यत् जगन्नाथस्य रथ-साम्यत्वेन juggernaut इति शब्दः समुद्भूतः। अत एव वयम् अवगन्तुं शक्नुमः यत् भगवतः जगन्नाथस्य यात्रैषा अशेष-संसारेण स्व-स्व-प्रकारेण कियता महता माहात्म्येन स्वीक्रियते। भगवतो जगन्नाथस्य रथयात्रायाः शुभेह्यस्मिन् अवसरे सर्वेभ्योह्यपि राष्ट्रवासिभ्यः शुभ-कामनाः वितरामि, भगवतो जगन्नाथस्य श्रीचरणेषु अपि प्रणामाञ्जलीन् निवेदयामि।

अस्ति भारतस्य विविधता हि अस्य विशेषता। भारतस्य विविधता चास्ति भारतस्य शक्तिरपि। रमजानस्य पवित्रमासः पवित्र-भावैः प्रार्थनाभिः च सर्वैः समाचरितः। सम्प्रति वर्तते ईद्-पर्व। ईद्-उल्-फित-पर्वणः अवसरे मम पक्षतः सर्वेभ्यः भूरिशः मङ्गल-कामनाः। रमजान-मासः पुण्य-दानस्य मासत्वेन ख्याप्यते, प्रसन्नतायाः वितरणस्य मासः अस्ति, यावन्-मात्रिकं प्रसन्नता-वितरणं भवति, तावन्त्यः प्रसन्नताः विवर्धन्ते। आगच्छन्तु, वयं सर्वे मिलित्वा एतेभ्यः पवित्र-समुत्सवेभ्यः प्रेरणाम् आदाय प्रसन्नता-प्रवाहान् वितरेम, देशञ्च अग्रेसारयेम !!

रमजानस्य पवित्र-मासावधौ उत्तर-प्रदेशस्य बिजनौरस्य मुबारकपुर-ग्रामस्य एका महती प्रेरिका घटना मम दृष्टिपथमागता। प्रायेण सार्ध-त्रि-सहस्त्रं अस्मदीयाः मुस्लिम-समुदायस्य भगिन्यः भ्रातरः चात्र लघु-ग्रामे निवसन्ति, अत्र आधिक्येन मुस्लिम-समुदायस्य जनाः वर्तन्ते । रमजान-मासावधौ ग्रामवासिनः मिलित्वा शौचालयानां निर्माणार्थं निर्णीतवन्तः। अपि च, वैयक्तिक-शौचालयानां निर्माणार्थं सर्वकार-पक्षतः अपि साहाय्यं प्रदीयते। एतेभ्यः ग्रामवासिभ्यः प्रायेण सप्त-दश-लक्ष-रूप्यकाणि साहाय्य-रूपेण प्रदत्तानि। एतद् ज्ञात्वा भवन्तः सुखदम् आश्चर्यम् आनन्दं चापि अनुभविष्यन्ति। अस्मदीयाः सर्वेह्यपि मुस्लिम-भ्रातरः भगिन्यः च, रमजान-मासावधौ सर्वकाराय तां सप्तदश-लक्ष-रूप्यकात्मिकां राशिं परावर्तितवन्तः। अपि च, ते एवम् उक्तवन्तः यत् वयं स्वश्रमेण स्वीय-रूप्यकैः एव निज-शौचालयान् निर्मास्यामः। सप्त-दश-लक्ष-रूप्यकात्मिका एषा राशिः ग्रामस्य अन्य-सौविध्यार्थम् उपयुक्तः स्यात्। रमजानस्य पवित्रावसरः समाजस्य लाभार्थं उपयुक्तः इति कृत्वा अहं मुबारकपुरस्य सर्वान् अपि ग्रामवासिनः अभिनन्दामि। तेषां प्रत्येकमपि निर्णयः अतितरां प्रेरकः अस्ति। अपि च, सर्वतोह्यधिकतरम् अवधेयमिदं यत् तैः मुबारकपुरम् अनावृत-शौचाचरणात् मुक्तं विहितम्। वयं जानीमः यत् सिक्किम-हिमाचल-केरळ-इति राज्य-त्रयं पूर्वतः एव अनावृत-शौचाचरणात् मुक्तं घोषितम्। सप्ताहेह्यस्मिन् उत्तराखण्ड-हरियाणा-इति राज्य-द्वयमपि ह्यष्ठस्त्र- इति अनावृत-शौचाचरणात् मुक्तं घोषितम्। एतत्-कार्य-पूर्त्यर्थम् अहम् एतेषां पञ्चानां राज्यानां प्रशासनाय, शासनाय, विशेषेण च, जनता-जनार्दनाय साधुवादान् व्याहरामि।

वयं संयुक्तया जानीमः - व्यक्तेः जीवने, समाजस्य जीवने च यत् किमपि समुचितं करणीयम् अस्ति चेत्,अतितरां कठोरः परिश्रमः करणीयो भवति। यदि अस्माकं हस्त-लेखः सम्यक् नास्ति, स च सम्यक् करणीयः चेत् तदा सुदीर्घ-कालं यावत् अतितराम् अवधानतया प्रयतनीयं भवति। तदनु एव,शरीरस्य मनसः च अभ्यासः परिवर्तते। स्वच्छतायाः विषयोह्यपि एतादृशः एवास्ति। कानिचित् व्यसनानि अस्मदीय-स्वभावस्य अङ्गरूपाणि सञ्जातानि। एतानि अस्मदीयाचरणस्य अङ्गत्वेन वर्तन्ते। एतानि अपसारयितुम् अविरतं अस्माभिः नूनं प्रयतनीयम्। वारं वारं एतद्विषयकं स्मरणमपि करणीयम्। प्रत्येकमपि जनस्य ध्यानाकर्षणमपि विधेयम्। समीचीनानां प्रेरिकाणां च घटनानां पौनःपुनिकं स्मरणमपि करणीयम्। तथा च, प्रसीदामितराम् यत् अद्यत्वे स्वच्छता-विषयः सर्वकारीय-कार्यक्रमत्वेन एव नैव प्रवर्तते। अयं तु जन-सामान्यस्य जन-समाजस्य च आन्दोलनत्वेन सततं परिणमते। शासनारूढाः जनाः अपि यदा जन-सह-भागितया कार्यमेनत् अग्रेसारयन्ति, तदा अतुलनीया शक्तिः विवर्धते।

विगतेषु दिनेषु एका उत्तमा घटना मम ध्याने उपस्थिता यामहं भवतां समक्षं नूनं वर्णयिष्यामि। एषास्ति घटना आन्ध्रप्रदेशस्य विजयनगरम्-जनपदस्य। तत्रत्य-प्रशासनेन जन-सह-भागितायाः बृहदेकं कार्यं आरब्धम्। मार्च-मासे दश-दिनाङ्कात् प्रातः षड्-वादनात् आरभ्य चतुर्दश-दिने प्रातः दशवादनं यावत् अर्थात् शत-होरावधिं यावत् अनारतम् अभियानम्। लक्ष्यं किमासीत् ? शत-होरावधौ एक-सप्ततौ ग्राम-पञ्चायतेषु दश-सहस्त्रं गृहाभ्यन्तरीणानां शौचालयानां निर्माणम्।

अयि भोः मम प्रियाः देशवासिनः ! वृत्तमेनत् ज्ञात्वा भवन्तः प्रसन्नाः भविष्यन्ति यत् जनता-जनार्दनेन शासनेन च सम्भूय शतं होरासु दश-सहस्त्रं शौचालयानां निर्माणं सफलतया पूर्णतामानीतम्। एक-सप्ततिः ग्रामाः ह्यष्ठस्त्र- इति अनावृत-शौचाचरणात् मुक्ताः जाताः। अहं शासनाधिरूढान् शासनिकाधिकारिणः विजयानगरम्-जनपदस्य एतान् ग्राम-नागरिकान् च भूरिशः वर्धापयामि यत् ते परिश्रम-पराकाशं स्वीकृत्य उत्तमं प्रेरकोदाहरणम् उपस्थापितवन्तः।

एतेषु दिनेषु ‘मन की बात’ इति कार्यक्रमे सततम् अहं जनता-जनार्दनस्य पक्षतः परामर्शान् अवाप्नोमि। एते च, NarendraModiApp- इत्यत्र MyGov.in-इत्यत्र पत्राणां माध्यमेन,आकाशवाणीतः चाधिगम्यन्ते।

श्रीमान् प्रकाश-त्रिपाठी आपातकालं स्मारयन् अलिखत् यत् जून-मासीयं पञ्च-विन्शतितमं दिनं लोकतन्त्रस्य इतिहासे कालुष्य-पूर्ण-काल-खण्ड-रूपेण वर्तते। श्रीप्रकाश-त्रिपाठिनः लोकतन्त्रं प्रति एषा जागृतिः प्रशंसनीया वर्तते। लोकतन्त्रं न केवलम् एका व्यवस्था, एतच्च संस्कारत्वेन अपि विराजते। Eternal Vigilance is the Price of Liberty - लोकतन्त्रं प्रति अनारतम् अवधानता नितराम् आवश्यकी अत एव लोकतन्त्रस्य आघातकराणि तथ्यानि अपि स्मरणीयानि, तथा च, अस्माभिः लोकतन्त्रस्य समीचीन-तथ्यान्वितायां दिशि अग्रेसर्तव्यम्। विगते शताब्दे पञ्चसप्तति-तमे वर्षे जूनमासे पञ्च-विन्शतितमा रात्रिः तादृशी कालुष्यपूर्णा आसीत, यां न कश्चन अपि लोकतन्त्र-प्रेमी विस्मर्तुं शक्नोति। न कश्चन भारतवासी एनां विस्मर्तुं पारयति। एकप्रकारेण अशेष-देशः कारागृहत्वेन परिवर्तितः आसीत्। विरोधि-स्वरः दमितः। जय-प्रकाश-नारायणेन सह राष्ट्रस्य गण-मान्याः नेतारः कारासु बन्दिनो विहिताः। न्याय-व्यवस्था अपि आपातकालस्य भीकर-रूपस्य छायया आच्छादिता आसीत्। वार्तापत्राणि तु पूर्णरूपेण प्रतिबद्धानि आसन्। पत्रकारिता-जगतः विद्यार्थिनः, लोकतन्त्रस्य कर्मकराः च लोकतन्त्रस्य तं कालुष्यपूर्णं कालखण्डं स्मरन्तः लोकतन्त्रं प्रति अवधान-संवर्धनाय सततं प्रयासान् अनुतिष्ठन्तः आसन्। अपि चैतद् नूनं करणीयम्। तदा अटल-बिहारि-वाजपेयि-वर्यः अपि कारायां पिहितः आसीत्। यदा वर्षावधिकः कालः यापितः तदा तेन कारायामेव एका कविता लिखिता, अस्यां कवितायां तेन तत्कालीना मनःस्थितिः वर्णीता अस्ति -

झुलसाता जेठ मास,
शरद चाँदनी उदास,
झुलसाता जेठ मास,
शरद चाँदनी उदास,

सिसकी भरते सावन का,
अंतर्घट रीत गया,
एक बरस बीत गया,
एक बरस बीत गया ।।

सीखचों में सिमटा जग,
किंतु विकल प्राण विहग,
सीखचों में सिमटा जग,
किंतु विकल प्राण विहग,

धरती से अम्बर तक,
धरती से अम्बर तक,
गूंज मुक्ति गीत गया,
एक बरस बीत गया,
एक बरस बीत गया ।।

पथ निहारते नयन,
गिनते दिन पल-छिन,
पथ निहारते नयन,
गिनते दिन पल-छिन,
लौट कभी आएगा,
लौट कभी आएगा,
मन का जो मीत गया,
एक बरस बीत गया ।।

लोकतन्त्रस्य प्रेमिणः कठिन-तरं युद्धं सम्मुखीकृतवन्तः। भारतं नाम विशालं राष्ट्रम्, प्राप्ते सति काले भारतस्य प्रत्येकमपि जनस्य चेतसि लोकतन्त्रं कियत् व्यापकं विराजते - इति निर्वाचन-माध्यमेन सा लोक-शक्तिः प्रदर्शितास्ति। प्रत्येकमपि जनस्य चेतसि परिव्याप्तस्य अस्य लोकतन्त्रस्य भावः अस्मदीयः अमृतः रिक्थः वर्तते। अस्माभिः रिक्थोह्ययम् इतः परमपि दृढतरः करणीयः।

मम प्रिया देशवासिनः ! प्रत्येकमपि भारतीयः अद्यत्वेशिरान्सि उन्नमय्य गौरवम् अनुभवति । वर्षेह्यस्मिन् जून-मासे एकविन्शतितमे दिने सम्पूर्णमपि विश्वं योगमयं जातम् । जलतः पर्वत-पर्यन्तं जनाः प्रभाते एव योगाभ्यास-माध्यमेन भगवतः सूर्यस्य किरणानां स्वागतम् अकुर्वन्। कश्चन नाम वा भारतीयः भवेत् यो एतद्विषयेनूनंगौरवमनुभवेत् । एवं नास्ति यत् योगाचरणं पूर्वमपि न क्रियते स्म। परन्तु अद्यत्वे यदा योगसूत्रेण बद्धाः स्मः, योगः विश्वं संयोजयितुं कारणत्वेन विराजते। विश्वस्य प्रायेण सर्वेह्यपि देशाः योगस्य अवसरमेनं स्वीयावसर-रूपेण स्वीकृतवन्तः। चीन-देशेThe Great Wall of China - इत्यत्र जनाः योगाभ्यासम् अकुर्वन्। अपरत्र, Peru-देशेWorld Heritage Site- इति माचू-पिच्चू-स्थले यद्धि समुद्र-तलात् चतुःचत्वारिन्शत्-शत-मीटर-मितेन ऊच्चैः वर्तते, तत्रापि जनाः योगाभ्यासम् अकुर्वन्। फ्रांस-देशे एफिल-टॉवर-इत्यत्स्य छायायां जनाः योगमाचरितवन्तः। UAE-इत्रयत्र Abu Dhabi-नगरे चतुःसहस्त्राधिकाः जनाः सामूहिक-योगमाचरितवन्तः I अफगानिस्ताने हेरात-स्थले India Afghan Friendship Dam-इति सलमा-जलावृम्भे योगाभ्यासं कृत्वा जनाः भारतस्य सख्याय अभिनवम् आयामं प्रादुः। सिंगापुर-सदृशे लघुनि स्थाने सप्तत्यधिकेषु स्थलेषु कार्यक्रमाः

शेषभागःषष्टपुटे

शेषभागःपंचमपुटे

# 'मनोगतम्' – इति 'मनकी बात'

अभूवन्, अपि च, ते सप्ताहावधिकम् अभियानमेकंप्रवर्तितवन्तः। संयुक्त-राष्ट्र-संघेनअन्ताराष्ट्रिय-योग-दिवसम् आलक्ष्य दश प्रैष-मुद्राङ्काः प्रसारिताः। संयुक्त-राष्ट्र-संघस्य मुख्यालयेषु Yoga Session with Yoga Masters- इति कार्यक्रमः आयोजितः। संयुक्त-राष्ट्र-संघस्य अधिकारिणः, कार्मिकाः, अशेष-जगतः कूटनीतिज्ञाः चेति सर्वेह्यपि अत्र सहभागित्वं निरवहन्।

साम्प्रतं पुनरेकवारं योगेन विश्वस्य आभिलेख्यमपि अर्जितम्। गुजराते अमदावादे प्रायेण पञ्च-पञ्चाशत्-सहस्रं जनाः युगपदेव योगाभ्यासं कृत्वा अभिनवं विश्व-कीर्तिमानं विरचितवन्तः। अहमपि लखनऊ-नगरे योग-कार्यक्रमे सहभागित्वस्य अवसरं प्राप्तवान्, परञ्च, प्रथमवारं वर्षायां योगाभ्यासस्य सद्भाग्यं प्राप्तम्। अस्माकं सैनिकाः सियाचिन्-पर्वत-शिखरे यत्र विंशति-पञ्चविंशति-चत्वारिंशत्-डीग्रीमितं न्यूनं तापमानं भवति, तत्र योगाभ्यासं कृतवन्तः। अस्मदीयाः सशस्त्र-बलस्य, सीम-सुरक्षा-बलस्य, ITBP-बलस्य, केन्द्रीयारक्षितारक्षि-बलस्य, CISF-इति बलस्य चेति प्रत्येकमपि स्वीय-कर्तव्येन सहैव योगाभ्यासं स्वीयाङ्गत्वेन अङ्गीकृतवत्। एतद्-योग-दिवसावसरे अहम् उक्तवान् यत् संतति-त्रयम्, यतो हि तृतीयोह्ययम् अन्ताराष्ट्रिय-योग-वर्षीय-दिवसः, अतः कुटुम्बस्य सन्तति-त्रयं युगपदेव योगाभ्यासं कुर्वदेव तच्चित्रं प्रेषयेत्। काञ्चन दृश्य-वाहिका: अपि तथ्यमेनत् प्रचारितवत्यः अवसरेह्यस्मिन् अनेकानि चित्राणि मया लब्धानि, तेषु कानिचन चितानि चित्राणि NarendraModiApp- इत्यत्र संयोजितानि सन्ति। येन प्रकारेण अशेष-जगति योगः परिचर्च्यते, तस्मात् एकं लाभकरं तथ्यमेतत् समुद्भवति यत् अद्यतनः स्वास्थ्य-जागरूक-समाजः समीचीनतातः अनारोग्यतां प्रति अग्रेसरति। ते इदम् अनुभवन्ति यत् समीचीनतायाः महत्त्वं तु अस्त्येव, परञ्च, अनारोग्यतायाः कृते योगः उत्तमः मार्गः अस्ति।

'आदरणीय ! प्रधानमन्त्रि-महोदय ! अहं डॉ.अनिल-सोनारा, अमदवादतः वदामि। महोदय ! मम जिज्ञासा वर्तते। नातिचिरं केरळे वयं भवन्तं श्रुतवन्तः। विभिन्नेषु स्थलेषु उपहारत्वेन पुष्प-गुच्छाः प्रदीयन्ते। एतत्-स्थाने अस्माभिः स्मृति-उपहारत्वेन पुस्तकानि प्रदेयानि। एतद्विषयकः शुभारम्भः भवान् गुजराते निज-कार्यकाले विहितवान्। साम्प्रतं नैतत् अस्माभिः दृश्यते। so can we do something ? किं वयं सन्दर्भे अस्मिन् किमपि कर्तुं पारयेम ? येन देश-व्यापिना स्तरेण अस्य कार्यान्वयनं स्यात्।'

विगतेषु दिनेषु अहं मम प्रियतमेषु अन्यतमे कार्यक्रमे सहभागित्वस्य अवसरं लब्धवान्। केरळे सुष्ठु-कार्यक्रमः प्रचलति। कतिपय-वर्षेभ्यः श्री-पी-एन्-पणिकर-प्रतिष्ठानेन कार्यक्रमोह्ययं प्रचाल्यते यस्मिन् जनानां पठनाभ्यासः स्याद्, जनाः पठनं प्रति जागरूकाः स्युः चेति कृत्वा reading day, reading month-इत्युत्सवः आयोज्यते। अस्य कार्यक्रमस्य शुभारम्भार्थम् अहं तत्र गतवान्। तत्र मह्यम् एतत् सूचितं यत् ते पुष्प-गुच्छं नैव परञ्च पुस्तकं ददति। मह्यम् इदं रोचते स्म। मया यत् विस्मारितमासीत्, झटिति तत् पुनः स्मरणाधीनं जातम्। यतो हि, यदा अहं गुजराते आसम्, तदा मया प्रशासने एका परम्परा प्रवर्तिता आसीत् यत् वयं पुष्प-गुच्छं नैव, पुस्तकानि दास्यामः, आहोस्वित् करवस्त्रेण स्वागतं करिष्यामः। अपि च खादी-करवस्त्रेण एव, येन खादी-वस्त्राणां संवर्धनं स्यात्। यावत्पर्यन्तं गुजराते आसम्, अस्माकं सर्वेषां अभ्यासः जातः, परम्, अत्रागमनस्य अनन्तरं सः अभ्यासः अपगतः। किन्तु केरळ-गमनेन सः अभ्यासः पुनः जागृतः तथा च, अहं तु प्रशासने पुनः एतत् सूचयितुम् आरभम्। वयमपि शनैः शनैः तादृशं स्वभावं विकासयितुं शक्नुमः। तथा च, पुष्प-गुच्छस्य आयुः तु अत्यल्पं भवति। एकवारं स्वीकृत्य परित्यजामः। परन्तु, पुस्तकं दीयते चेत् तत्तु गृहस्य कुटुम्बस्य च अङ्गत्वेन परिभाव्यते। खादी-कर-वस्त्र-प्रदानेन अपि अनेकेषां निर्धनानां साहाय्यं भवति। व्ययः अपि न्यूनः भवति, समुचित-रूपेण तस्य उपयोगो भवति। यदा एतत् अहं वर्णयामि तदा संस्मरामि यत् एतादृश-व्यवहारस्य बहुमात्रिकम् ऐतिहासिकं महत्वं भवति। गते वर्षे यदा अहं च-देशं गतवान् तदा London-नगरे Britain-साम्राज्ञी, Queen Elizabeth मां निमन्त्रितवती। तत्र मातृ-सहजः परिवेशः आसीत्। आत्मीय-प्रेम्णा सा भोजनमपि कारितवती, परञ्च अनन्तरं सा मां सादरं अतितरां भावात्मक-स्वरेण सूत्रैः ग्रथितं लघु खादी-करवस्त्रं दर्शितवती, तदा तस्याः नयनयोः अलौकिकं ज्योतिः व्यराजत, सा उक्तवती यत् यदा मम विवाहः सञ्जातः तदा एतत् कर-वस्त्रं महात्म-गान्धी मङ्गल-कामना-उपहारत्वेन मह्यं प्रेषितवान्। कति वर्षाणि व्यतीतानि? परञ्च, Queen Elizabeth-महाभागया महात्म-गान्धिना प्रदत्तम् एतत् handkerchief-इति कर-वस्त्रं सम्भालितमस्ति। तथा च, सा मां दर्शयन्ती अस्ति- इति कृत्वा सा आनन्द-सन्दोहं अनुभवति स्म। अपि च, यदा अहं तत् पश्यन् आसं तदा सा साग्रहं माम् उक्तवती यत् स्पृष्ट्वा एतत् अनुभवेयम्। महात्म-गान्धिना प्रदत्तः अल्पीयान् अपि उपहारःतस्याः जीवनस्य अङ्गत्वेन अजायत, तस्याः इतिवृत्तस्य अविभाज्यः भागः अभवत्।

अहं विश्वसिमि यत् एताः कुरीतयः सहसा नैव परिवर्तन्ते। तथा च, यदा हि वयम् एतादृशं किमपि आलपामः, जनाः आलोचनामपि कुर्वन्ति। एवं संजायमाने सत्यपि तथ्ये, अस्माभिः सततं प्रयतनीयम्। कुत्रचित् गच्छामि, तत्र कश्चन पुष्पगुच्छम् उपाहरति चेत् तस्य प्रतिषेधं नैव करिष्यामि, परञ्च परिष्कारार्थं तु सततं प्रयतिष्यामहे।

मम प्रियाः देशवासिनः ! प्रधानमन्त्रिणः दायित्व-कारणात् अनेक-प्रकारकाणि कार्याणि मया करणीयानि भवन्ति। पञ्जिकासु मग्नाः भवामः, परञ्च, अहं स्वस्मै अभ्यासमेकं विकासितवान् यत् मम कृते यानि पत्राणि लभ्यन्ते तेषु कानिचित् अहं प्रतिदिनं पठामि। एवं हि अहं सामान्य-जनैः सह संपृक्तो भवामि। अनेक-प्रकारकाणि भवन्ति एतानि पत्राणि। पृथक्-पृथक् जनाः एतानि पत्राणि लिखन्ति एतेषु दिनेषु एकं तादृशं पत्रं पठितुम् अवसरं लब्धवान् यत् अवश्यं मया तद्विषये भवतां समक्षं विवर्णनीयम्। दूरे सुदूरे दक्षिण-प्रदेशे तमिलनाडु-राज्ये स्थितस्य मदुराई-नगरस्य एका गृहिणी अरुल-मोझी-सर्वनन् मह्यं पत्रमेकं प्राहिणोत्। सा अलिखत् यत् कुटुम्बस्य बालानां शिक्षणार्थं मया किञ्चित् आर्थिक-कार्य-जातं विधातुं विचारितम्। अतः मया 'मुद्रा-योजना'-माध्यमेन बैङ्कात् किञ्चित् धनम् आदत्तम्, विपणीतः च, सामग्रीम् आनीय आपूर्ति-कार्यम् आरब्धम्। एतादृश्यां स्थितौ मया अवगतं यत् सर्वकारः Government E-Marketplace-इत्याख्यां काञ्चित् व्यवस्थां प्रावर्तयत्। मया अन्विष्टम् यत् किमेतत् ? केचन जनाः मया पृष्टाः। तदनु अहम् आत्मानं तत्र पञ्जीकारितवती।

अहं देशवासिनः सूचयितुं इच्छामि यत् भवन्तः अपि लब्धे सति अवसरेInternet-इति अन्तर्जालेE-GEM – इत्यत्र अवलोकयन्तु। एषा नूतना लाभप्रदायिनी व्यवस्था वर्तते। यः कश्चन प्रशासनाय किमपि वस्तु-जातम् आपूरयितुं वाञ्छति, लघु-लघूनि वस्तूनि प्रेषयितुं इच्छति, यथा विद्युद्दीपान्, अवकर-कण्डोलिकाः, मार्जनीः, आसन्दिकाः, आधार-पटलानि च प्रेषयितुं वा विक्रेतुं वाञ्छति, सः अत्र स्वीय-पञ्जीकरणं कर्तुं शक्नोति। वस्तूनां गुणत्वं विलिख्य मूल्यादिकं निर्दिश्य च सूचयितुम् अर्हति। सर्वकारीय-विभागानां कृते एतत् अनिवार्यं वर्तते यत् ते नूनम् एतत् प्रेषितं सर्वं विवरणम् अवलोकयेयुः, अनन्तरं सर्वं सम्यक् अस्ति चेत् तद्वस्तु-प्रेषणाय आदेष्टव्यम्। एवंरीत्या ये मध्यस्थाः भवन्ति तेषामत्र हस्त-क्षेपो नैव भविता। सर्व-विधं पारदर्शित्वं समापन्नम्। प्रविधि-माध्यमेन एव सर्वं संजायते। अतःE-GEM- इति व्यवस्थायाः अन्तर्गतं ये जनाः पञ्जीकरणं कुर्वन्ति, तान् सर्वकारस्य सर्वे अपि विभागाः अवलोकयन्ति। मध्यस्थाः जनाः नैव भवन्ति इति कृत्वा वस्तूनि महार्घाणि नैव भवन्ति। अधुना अरुल-मोझी-महाभागा सर्वकारस्य अन्तर्जाल-वाहिकां प्रति यां यां सामग्रीं प्रेषयितुं शक्नोति तासां सर्वासां पञ्जीकरणं विहितवती। तस्याः पत्रमिदम् अतितरां रुचिकरं वर्तते। सा अलिखत् यत् एकतः मया 'मुद्रा'तः धनं लब्धम्, मम व्यापारः आरभत। E-GEM- इत्यस्याः अन्तर्गतं किं किम् अहं प्रेषयितुं प्रभवामि, तद्विषयिणी सूची स्थापिता, तथा च, PMO-इति प्रधानमन्त्रिणः कार्यालयात् आदेशः अवाप्तः।

मम कृते अपि नवमिदं वृत्तमासीत् यत् PMO-इत्यनेन किम् आदिष्टम्। सा अलिखत् यत् PMO-इत्यनेन थर्मोस्-इति उष्णता-रक्षक-द्वयं क्रीतम्, तदर्थं षोडश-शतं रूप्यकाणि अपि मया लब्धानि। एतदस्ति -शक्ती-करणम्। एषः चास्ति उद्यमिनां प्रोत्साहनावसरः यदि अरुल-मोझी मां पत्रं नैव अलिखिष्यत् तदा अहमपि एतदर्थं निध्यातुं नैव अपारयिष्यम्। एषा अस्ति देशस्य शक्तिः। अत्र पार-दर्शित्वमपि वर्तते, शक्तीकरणमपि उद्यमित्वमपि चास्ति।

मम प्रियाः देशवासिनः ! एकतः वयं योग-विषयकं गौरवम् अनुभवामः, अपरतः वयंअन्तरिक्ष-विज्ञाने अस्मदीयाः अधिगतोपलब्धीः अभिलक्ष्यापि गर्वम् अनुभवितुं शक्नुमः। इयमेवास्ति भारतस्य विशेषता। यदि अस्माकं पादौ योगाधृतौ भूमौ स्तः, अपरतः अस्मदीयानि स्वप्नानि सुदूरे गगनस्य सीमानम् अतिक्रान्तुं वर्तन्ते।

विगतेषु दिनेषु भारतेन क्रीडासु विज्ञाने चापि सुबहु अनुष्ठीय प्रदर्शितम्। अद्यत्वे भारतं न केवलं भूमौ, अन्तरिक्षे अपि स्वीयं ध्वजं उत्तोलयति। दिवस-द्वय-पूर्वमेव ISRO-इति भारतीयान्तरिक्षानुसन्धान-संघटनेन 'Cartosat-2 Series Satellite'-इत्यनेन साकं त्रिंशत् Nano-Satellites-यानानि प्रक्षिप्तानि। एतेषु उपग्रहेषु भारतमतिरिच्य फ्राँस, जर्मनी, इटली, जापान, ब्रिटेन, अमेरिका-प्रभृतयः प्रायः चतुर्दश देशाः समाविष्टाः सन्ति। nano-उपग्रहाभियानेन कृषि-क्षेत्रे, कृषकाणां कार्येषु, प्राकृतिकापत्सु चापि महत्-साहाय्यम् अवाप्स्यते। प्रत्येकमपि भारतीयः एतद्-गौरवमपि अनुभवितुं शक्नोति यत् कतिपय-दिवसेभ्यः प्राक्, ISRO-इत्यनेन ÒSAT-19-इत्यस्य सफलं प्रक्षेपणं विहितम्। अपिच, भारतेन अधुनावधि प्रक्षिप्तोपग्रहेषु सर्वाधिकं भारयुतं अवर्तत। अस्माकं देशस्य वार्तापत्रैः तु अस्य भार-तुलना गज-भारेण सार्धं विहितासीत्। भवन्तः कल्पयितुं शक्नुवन्ति यत् अस्मदीयाः वैज्ञानिकाः अन्तरिक्षे कियत् बृहत् कार्यं कृतवन्तः इति। जूनमासे ऊनत्रिंशति दिने 'मार्स-मिशन' इति कार्यक्रमस्य सहस्रं दिनानि पूर्णतां गतानि। सहस्र-दिनानन्तरमपि अस्मदीयं मङ्गल-यानं कार्यं करोति, चित्राणि प्रेषयति, सूचनाः प्रेषयति,scientific data-इति वैज्ञानिक-विवरणं च प्राप्यते। इयं हि अन्तरिक्ष-क्षेत्रे अस्मदीया महत्वाधायिनी सिद्धिः वर्तते।

एतेषु दिनेषु क्रीडासु अपि अस्मदीयानां यूनां प्रवृत्तिः रुचिश्च समेधेते इति वयं पश्यामः।

साम्प्रतं एतद् अवलोक्यते यत् अध्ययनेन सहैव क्रीडास्वपि अस्माकीनाः युवानः स्वीयं प्रशस्तं भविष्यत् परिभावयन्ति। तथा च, अस्माकं क्रीडकानां कारणात्, तेषां पुरुषार्थेन, तेषाञ्च सिद्धि-कारणात् राष्ट्रस्य नामापि कीर्ति-युतं भवति। नातिचिरमेव, भारतस्य बैडमिंटन्-क्रीडकः किदाम्बी-श्रीकांतः इंडोनेशिया-मुक्त-स्पर्धायां विजयश्रियं अवाप्य राष्ट्रस्य गौरवम् अवर्धयत्। अस्यै उपलब्ध्यै तं तस्य प्रशिक्षकाय च हृदयेन अभिनन्दामि। कतिपय-दिनेभ्यः प्राक्, पी.टी.उषा-इति सुख्याताया: धाविकायाः Usha School of Athletics- इत्यस्य Synthetic Track-उद्घाटन-समारोहे समुपस्थितेः अवसरः लब्धः। वयं क्रीडाः यावतीः विवर्धयिष्यामः तावन्तः एव क्रीडा-भावाः, तावत्यःस्पर्धा-भावनाः च विवर्धिष्यन्ते। क्रीडा: व्यक्तित्वस्य विकासार्थमपि अतितरां महत्वाधायिनीं भूमिकां निर्वहति। सर्व-विध-व्यक्तित्व-विकासाय खेलानां अतिमाहात्म्यं वर्तते। देशे प्रतिभानां किञ्चिदपि नैयून्यं नैव वर्तते। यदि अस्माकं कुटुम्बे अपि बालानाम् अभिरुचिः खेला-विषयिणी अस्ति चेत् तेभ्यः ताभ्यश्च नूनम् अवसराः प्रदेयाः। तान् तांश्च क्रीडा-क्षेत्रेभ्यः समाकृष्य कक्षेषु पिहित्वा पुस्तक-पठनाय च विवशीकरणं नैवास्ति समीचीनम्। ते तांश्च पठन्तु नाम, तस्मिन् क्षेत्रे अपि अग्रेसरन्ति चेत्, नूनम् अग्रेसरन्तु। परञ्च क्रीडासु तेषां सामर्थ्यम् अस्ति, अभिरुचिः वर्तते चेत् तदा, विद्यालयस्य, महाविद्यालयस्य,कुटुम्बस्य परिपार्श्व-वर्तिनः, सर्वे अपि जनाः तान् समर्थ्य प्रोत्साहयेयुः। भाविनीनां Olympic-स्पर्धानां कृते प्रत्येकमपि जनेन स्वप्नायितुं शक्यते।

पुनरेकवारम्, मम प्रियाः देशवासिनः ! वर्षर्तुः, अनारतं उत्सवानां परिवेशः च परमार्थेन – एतत्-सर्वा कालखण्डस्य नूतना एव अनुभूतिः भवति। अहं पुनरेकवारं भवद्भ्यः सर्वेभ्यः मङ्गल-कामनाः व्याहरन् आगामि मनोगतम् इति 'मन की बात' इत्यस्य समये पुनः संभाषिष्ये। नमस्कारः !!!

खादी वस्त्र ही नहीं, विचार है !
आदर्श ग्रामोद्योग समिति, दिल्ली
खादी वस्त्रों का विशाल भण्डार
✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल (रेडीमेड) ✪ रेशम साड़ी (प्रिन्ट) ✪ रेशम स्पन व रेडीमेड ✪ पोली खादी
सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।
खादी ग्रामोद्योग भवन
✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, (उ० प्र०)
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094
फोनः-0120-2631855, 9899334204

पाठकानां कृते सूचनाः-
कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कं रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-
Sanskrit samvad,
Current A/C No. 22490200000142,
Indian Overseas Bank, Yamuna Vihar,
Delhi-110053
IFC Code- IOBA0002249

राष्ट्रकरः आपणः

# राष्ट्रकरः जीएसटी स्थानांतरणम्। पंजीकरण संबंधित प्रश्नाः

## विभिन्न स्रोतेभ्यः प्राप्ताः जीएसटी स्थानांतरणम् संबधित प्रश्नानां समीक्षानन्तरम् प्रश्नानामेकं संकलनम् अत्र प्रस्तुतम् अस्ति।

## एतेषां प्रश्नानाम् उत्तराणि निम्नलिखितानि सन्तिः।

| क्र.स. | प्रश्नाः | उत्तराणि |
|---|---|---|
| 1 | यदि अहं पंजीकरणायावेदनं कृतवान् परञ्च एआरएन न प्राप्तवान् तर्हि मया किं कर्त्तव्यम्? | कृपयावेदन प्रक्रिया पूर्णं कुर्वन्तु। एआरएन स्वयमेवोत्पन्नं भविष्यति |
| 2 | यदि मया एआरएन न प्राप्तम् अथवा एआरएन तु प्राप्तं परन्तु जीएसटीआईएन न प्राप्तं उभयोः अहं वस्तु सेवायाः चाथवा उभयोः पृथक् रुपेणापूर्तिं कथं करिष्यामि? | भवान् वस्तु अथवा सेवा उत् उभयोः आपूर्ति बीजके जीएस. टीआईएन अथवा एआरएनस्या-ल्लेखं विनाऽपि कर्तुं शक्यते। जीएसटीआईएन प्राप्तेसति भवतः जीएसटीआईएन अस्योल्लेख सहितं संशोधित बीजकं प्रस्तुतकरणीयं भविष्यति। एतादृशी आपूर्ति भवतेः स्वायकर विवरणे प्रदर्शनीयम् अथ च अस्योऽपरि करदानमपि भविष्यति। |
| 3 | यदि मया जीएसटी मध्ये स्थानातंरणं कृतम् अंनंतिम आई डी अपि प्राप्तम् परन्तु जीएसटीआइ एन न प्राप्तं तर्हि वस्तु अथवा सेवा अथवा उभयोः आपूर्ति कथं करवाणि? | भवतः अनंतिम आईडी एव भवतः जीएसटीआईएस भविष्यति। भवान् वस्तु अथवा सेवा अथवा उभयोः आपूर्त्यर्थम् बीजके जीएसओआईएनस्य स्थाने पीआईडी अस्योल्खं कर्तुं शक्यते। |
| 4 | अहं केन्द्रीयोत्पाद शुल्काथवा सेवाकरे पंजीकृतासीत् परन्तु अहं स्थानातंरण न कृतवान् अतः अहं नूतन पजीकरणम् नीतवान्, किम् मया ट्राजिशनल (संक्रमण) क्रेडिटमिलिष्यति | यदि भवान् स्वं पंजीकरणावेदने पूर्वकेन्द्रीयोत्पाद शुल्कस्याथवा सेवाकरस्य पजीकरण संख्यायाः उल्लेखं कृतमस्ति तर्हि भवान् सीजीएसटी अधिनियम 2017 अस्य धारायाः 140 अस्यसह पठित सीजीएसटी नियमः 2016 नियमस्य 117 अन्तर्गते ट्राजिशनल क्रेडिटस्य पात्रं भविष्यति। |

अस्वीकरणम्-उपर्युक्तोत्तराणि केवलं शैक्षणिक मार्गदर्शनस्य चोद्देश्याय वर्तते। एतेषां अधिनियमानां बाध्यता नास्ति ।


वस्तु सेवा करञ्च
शोभनं सरलं चास्ति




# जीएसटी

## बीजक निर्माणं सरलमस्ति!

व्यापारिवर्गेषु केचनाशंकाः सन्ति यत् जीएसटी बीजकनिर्धारित प्रारुपानुसारं समुत्सृजनं भविष्यति। बीजक समुत्सृजनं च कठिना प्रक्रिया भविष्यति। नेतत् सत्यम्। बीजक संबधित जीएसटी प्रावधानविषयेषु केचन महत्त्वपूर्णं तथ्यान् सर्वाणां हितधारकाणां सूचनायै प्रस्तुतं क्रियते।

## कर बीजक विषये महत्त्पूर्णतथ्यानि

1. सर्वे जीएसटी करदातास्व बीजकस्य प्रारुपं निर्माणाय स्वतन्त्रमस्ति।
2. जीएसटी अधिनियमानुसारं बीजके केवलं केचन विशेष सूचनाः भवनानिवार्यमस्ति।
3. वस्तु सेवाभ्यः च बीजकसमुत्सृजनं निर्धारितमवधिः भिन्नं-भिन्नमस्ति। अवधिरैषा वस्तुस्थानान्तरणात् पूर्वं कदापि भवतुं शक्यते। सेवाभ्यः च एषा सेवान्तरणस्य 30 दिनाभ्यन्तरमस्ति।
4. लघुकरदातारः यथा लघु अल्पशोविक्रेता यः पंजीकृत क्रेतृभ्यः 200 रुप्यकाणि यावतादानं प्रदानं करोति। तैः अस्यकृते पृथक् बीजकसमुत्सृजनमावश्यकं नास्ति। एतादृशे-आदानप्रदाने प्रतिदिनान्ते एकं समेकित बीजकं समुत्सृजनं कर्तुं शक्यते। यद्यपि क्रेतृभ्यः याचने सति आपणिकैः समृत्सृजनमनिवार्यं भविष्यति।
5. सामान्य परिस्थिषु बीजकस्यप्रत्येकं मालवाहकायावश्यकं भविष्यति। यद्यपि जीएसटी बीजकसंदर्भ संख्याप्राप्तकरणस्यसुविधाऽपि प्रदानं करोति। यदि करदाता संख्यैषानुक्रंमाक प्राप्तं कृतवान् तर्हि वस्तुं परिवहनसमये कर्गद बीजकस्यावश्यकता न भविष्यति। सुविधैषा प्रायशः भावीसमस्या यथा कर्गदबीजकस्यलोपभवनेवस्तुस्थानान्तरणसमये विकृते सति नष्टेसति हलकरणे सहायको भविष्यति।
6. लघुकरदातृभ्यः अनुपालनस्यभारं न्यूनं करणाय जीएसटी अधिनियमैतत् प्रावधानं कृतं यत् 1.5 कोटी रूप्यकाणि यावत् वार्षिक व्यवसाय युक्त करदातृन् बीजके वस्तुनः एचएसएन कूटसंख्यायाः उल्लेखमाावश्यकमस्ति।
7. यातृ-धनादेश अभिरक्षायात्री परिवहन क्षेत्रे वृहत् संख्यां विक्ष्य करदातृन् स्वबीजकेषु क्रतृणां निवाससकेतं करदातृन स्वीजकेषु क्रेतृणां निवाससकेतं बीजकस्य च क्रमसख्योल्लेखमावश्यकं नास्ति।
8. यदा वस्तु प्रेषयन् वर्तते परन्तु परिवहनसमये वस्तुमात्रायाः ज्ञानं नास्ति तदा वस्तुं प्रेक्षणसमये चालानसह प्रेषितुं शक्यते। बीजकं च प्रेषणानन्तरं प्रकाशितुं शक्यते।
9. यदि करयोग्यहीनवस्तुस्थानान्तरणाय वैटबीजकसमृत्सृजनं कृतमस्ति तर्हि वस्तुनः पृथक् बीजकसमृत्सुजनं नावश्यकम्।

davp 15502/13/0079/1718

जीएसटी संबंधित कस्यापि ज्ञानाय @askGST_GOI अपरि ट्वीट करोतु।

करस्य प्रत्यर्पणम्, देशस्य निर्माणम्

केन्द्रीयोत्पाद सीमाशुल्कच वणिग्गण
राज्याणां/संघराज्यक्षेत्राणां वाणिज्यिक कर विभागः
www.cbec.gov.in, www.cbec-gst.gov.in

जीएसटीभ्यः सिद्धाः भक्तु। वस्तु सेवाकरञ्च ( जी.एस.टी. ) 1 जुलाई 2016 तः प्रारम्भः भविष्यति




# विभिन्नाभिलेख स्थापनात् स्वतन्त्रता।

## जीएसटी-अन्तर्गते-एकैवाभिलेखं पर्याप्तम्।

### अवक्षणाभिलेखं च

1. जीएसटी मध्ये अनुपालनस्य सत्यापनं:- यदि आवश्यकं भविष्यति चेत् अवक्षणाभिलेखस्य सत्यापनमाध्यमेन भविष्यति।
2. एकैव करं एकैव चाभिलेखम्- वैटोत्पादशुल्क सेवाकरस्य च भांति विभिन्नप्रकारस्य करेभ्यः पृथक्-पृथकभिलेखस्थापनस्यावश्यकतानास्ति।
3. अवक्षयणाभिलेखस्य प्रारुपचयनस्य स्वतन्त्रता अस्ति अन्यञ्च केवलं केचननिर्धारितज्ञानस्य अवज्ञानमावश्यकमस्ति। अभिलेखकर्गदाधारित सुवाह्यलेखसंरुप यस्मिन् संगणकस्य मुद्रितपथक छायाथवा अङ्कीयदश्यामिलेखंस्यरुपे स्थातुं शक्यते।
4. आवश्यकाभिलेखका:-
   ( क ) स्वव्यापार समये व्यक्तिना कृतापूर्ति अथवा प्राप्तवस्तु सेवायाः च सर्वाभिलेखाः।
   ( ख ) आयातितवस्तुनः सर्वाभिलेखाः
   ( ग ) कश्चिदन्यसहायक सुवाह्यसंरुपयथानुबंधा मूल्योद्धरण यः जीएसटीमध्ये भवतः दायित्वं दर्शयति।
5. अदृवक जीएसटी-अभिलेखं वैद्युतक प्रारुपे अपि स्थानुं शक्यते।
6. यस्मिन् करश्रेण्याः करदातानिर्धारित प्रक्रियायाः अनुसारमभिलेखं न स्थापितुं शक्यते, तत्रायुक्त निर्धारित प्रक्रियायाः अतिरक्तमभिलेखस्य स्थापनायाः अनुमतिं दातुं शक्यते।
7. कोटिद्वयन्यून व्यवसायकारिकरयोग्यव्यक्तिं स्वाभिलेखस्याभिलेखं परीक्षायोजनं वार्षिककरदानेन सह रेकन्सिलीऐशन विवरणं प्रेषणमनिवार्यम् नास्ति।
8. कारकरः। भारवाहकस्वामिनः। दत्तांशभण्डार स्वामिनः हेतु सरलाभिलेखाः-

**कारकरः** कारकरः हेतुः कार्यरता: जनान् सिद्धान्तः प्राप्ताथवा स्थानान्तरणवस्तु सेवाकरश्च विवरणं मूल्यमात्रा च प्रत्येकं सिद्धान्तं प्रस्तुतं कृते सति अभिलेखानां विवरण प्रकाशनभिलेखा संस्थापनमावश्यकमस्ति।

**परिवहनम्ः** वस्तुनः परिवहनव्यवसायतः संबधित जनान् परिवहनाय दत्तं वस्तु एवं दीयमानं वस्तु परिवहनाय भाण्डागारे सुरक्षितं वस्तुनः अभिलेखसंस्थापनमावश्यकम्।

**दत्तांशभण्डारस्वामीः** दत्ताशभण्डाराथवा दत्ताशभण्डारचालित कर्त्ताजनं वस्तुप्रेषणं, गतिविधिः, प्रापणं, समर्पणं दत्तांशभण्डारे शेष वस्तुनः अभिलेखसंस्थापनमावश्यकम्।

जीएसट संबंधित कस्यामपि ज्ञानाय @askGST_GoI उपरि ट्वीट करोतु।

केन्द्रीय उत्पाद सीमा शुल्क बोर्ड च राज्यनां/ संघराज्यक्षेत्राणां वाणिज्यिक कर विभागः
www.cbec.gov.in

davp 15502/13/0071/1718



अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः,
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, शुभम् आर्य, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः:sanskritsa mvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।